# ISWK SHARING KNOWLEDGE

Class VIII

Subject- Sanskrit 3rd Language


Topic-

## पाठः - चन्द्रगुप्तस्य न्यायः

By - Acharya Sushil Sharma

## 2

# चन्द्रगुप्तस्य न्यायः



wati House (India) Private Limited

तन्मयः – एतत् त्वं किं करोषि?

प्रणयः – किं न पश्यसि, अहं चित्रं रचयामि।


तन्मयः – एतत् कस्य चित्रम्?

प्रणयः – एतत् चाणक्यस्य चित्रम्। किं त्वं जानासि चाणक्यः कः आसीत्?

तन्मयः – आम्! दूरदर्शनस्य कार्यक्रमे अहं चाणक्यनाटकम् अपश्यम्। सः एव चाणक्यः चन्द्रगुप्तं नृपम् अकरोत्। प्रणय! चाणक्यस्य विषये किंचित् वद।

प्रणयः – कस्मिंश्चित् ग्रामे गोपालकाः धेनूः वने चारयितुम् अनयन्। तदा ते बालाः 'राजा–राजा' इति क्रीडितुम् आरभन्। एकः नृपः अभवत्, द्वितीयः अमात्यः, तृतीयः सेनापतिः शेषाः च प्रजाजनाः अभवन्।

तन्मयः – आम्! आम्! वयम् अपि एवम् 'अध्यापक–अध्यापक' 'माता–बालक' च अक्रीडाम।



**प्रणयः** – तदा एव तत्र द्वे महिले आगच्छताम्। एकस्याः अङ्के एकः शिशुः आसीत्। नृपः अपृच्छत्–युवां किमर्थम् आगच्छतम्? एका महिला अवदत–राजन्! इयं मम सेविका अस्ति। अधुना एषा मम शिशुं स्वशिशुः कथयति। दयानिधान! दयां कुरु। न्यायं कुरु।

**तन्मयः** – अहो! तदा किम् अभवत्?

Saraswati House (India) Private Limited

**प्रणयः** – तदा नृपः ते महिले ध्यानेन अपश्यत् अवदत् च–'शिशोः द्वे खण्डे कृत्वा अर्धं अर्धं ताभ्यां यच्छ।'

**तन्मयः** – किं सः शिशोः खण्डे अकरोत्?

**प्रणयः** – न, न! यावत् ते खण्डे करणाय उत्तिष्ठन् तावत् अन्या महिला नृपस्य चरणयोः अपतत् अवदत् च–महाराज! भवान् शिशुं तस्यै एव यच्छतु, शिशोः खण्डे मा करोतु।

**तन्मयः** – ततस्ततः किम्?

**प्रणयः** – तदा नृपः क्रुध्यन् अवदत्– अमात्य! सैव शिशोः माता अस्ति। तस्यै बालकं यच्छ। अन्यायाः च शिरश्छेदनं कुरु। किम् जाने? तदा किम् अभवत्?

**तन्मयः** – न! अहं न जानामि।

**प्रणयः** – एकः नरः तत्र एतत् सर्वम् अपश्यत्। सः तस्य बालकस्य न्यायं दृष्ट्वा विस्मितः अभवत्। सः बालकस्य मातुः समीपं गत्वा अवदत्–देवि! स्व-बालकं मह्यम् यच्छ। अहम् इमं पाठयित्वा नृपं करिष्यामि।

सः बालकः चन्द्रगुप्तः आसीत्। स नरः चाणक्यः आसीत्।

© New Saraswati



## शब्द-शक्तिः (Word Meanings)

| | | | | | |
|---|---|---|---|---|---|
| रचयामि | – (मैं) बना रहा हूँ | (I) make | अङ्के | – गोद में | in the lap |
| कस्मिंश्चित् | – किसी में | in some | दयानिधान | – दयालु | kind |
| गोपालकाः | – ग्वाले | cow-men | द्वे खण्डे | – दो टुकड़े | two pieces |
| चारयितुम् | – चराने के लिए | for grazing | अर्धम् | – आधा | half |
| अमात्यः | – मंत्री | minister | शिरश्छेदनम् | – सिर काटना | to chop the head |

### प्रत्यययुक्त शब्द (Words with a Suffix)

| | | |
|---|---|---|
| चारयितुम् | – चर् (प्रेरणार्थक) + तुमुन् (प्रत्यय) | |
| क्रीडितुम् | – क्रीड् (धातु) + तुमुन् (प्रत्यय) | |
| कृत्वा | – कृ (धातु) + क्त्वा (प्रत्यय) | |
| दृष्ट्वा | – दृश् (धातु) + क्त्वा (प्रत्यय) | |

### सन्धिच्छेद (Disjoining words)

| | |
|---|---|
| किञ्चित् | – किम् + चित् |
| कस्मिंश्चित् | – कस्मिन् + चित् |
| ततस्ततः | – ततः + ततः |
| सैव | – सा + एव |
| शिरश्छेदनम् | – शिरः + छेदनम् |

### समस्त पद (Compound Words)

| | |
|---|---|
| चाणक्यनाटकम् | – चाणक्यस्य नाटकम् |
| प्रजाजनाः | – प्रजायाः जनाः |

(India) Private Limited



# अभ्यास



## सम्प्रति लेखनीयम्

### 1. एकपदेन उत्तरत।

(एक पद में उत्तर दीजिए। Answer in one word.)

(क) प्रणयः **कस्य** चित्रम् अरचयत्? ..............................

(ख) गोपालकाः धेनूः **कुत्र** अनयन्? ..............................

(ग) वने बालाः **किं** कर्तुम् आरभन्? ..............................

(घ) बालकस्य न्यायं दृष्ट्वा **कः** विस्मितः अभवत्? ..............................

(ङ) सः बालकः **कः** आसीत्? ..............................

© New Saraswati House (

## 2. वाक्यानि शुद्धानि कृत्वा पुनः लिखत।

(वाक्यों को शुद्ध करके पुनः लिखिए। Correct the sentences and rewrite them.)

(क) बालकाः 'राजा-राजा' इति **अक्रीडत्**। ..........................................................

(ख) महिला नृपस्य चरणयोः **अपतताम्**। ..........................................................

(ग) अहम् एकं नाटकम् **अपश्यत्**। ..........................................................

(घ) युवां सदा सत्यम् **अवदताम्**। ..........................................................

(ङ) तौ क्रीडाक्षेत्रे **अधावतम्**। ..........................................................

## 3. प्रश्ननिर्माणं कुरुत।

(प्रश्न निर्माण कीजिए। Frame questions.)

**उदाहरणम्–** सा **शिशोः** माता अस्ति। सा **कस्य** माता अस्ति?

(क) प्रणयः **चित्रं** रचयति। ..........................................................

(ख) चाणक्यः **चन्द्रगुप्तं** नृपम् अकरोत्। ..........................................................

(ग) **तस्याः** अङ्के शिशुः आसीत्। ..........................................................

(घ) एकः **नरः** सर्वम् अपश्यत्। ..........................................................

(ङ) सः बालकः **चन्द्रगुप्तः** आसीत्। ..........................................................

Limited

## भाषा-अवबोधनम्

**1. निम्नलिखितक्रियापदानाम् धातुः, लकारः, पुरुषः वचनं च लिखत।**

(निम्नलिखित क्रियापदों के धातु, लकार, पुरुष तथा वचन लिखिए। Parse the words given below.)

| | शब्दः | | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| (क) | अपश्यम् | – | ........................... | ........................... | ........................... | ........................... |
| (ख) | क्रीडाम | – | ........................... | ........................... | ........................... | ........................... |
| (ग) | करोतु | – | ........................... | ........................... | ........................... | ........................... |
| (घ) | वदताम् | – | ........................... | ........................... | ........................... | ........................... |

**2. अधोलिखितवाक्यानि लृट्लकारे परिवर्तयत।** **(भविष्यत् काल)**

(दिए गए वाक्यों को लृट् लकार में परिवर्तित कीजिए। Rewrite the following sentences in future tense.)

उदाहरणम्– वयम् अपि 'अध्यापक-अध्यापक' अक्रीडाम। **वयम् अपि 'अध्यापक-अध्यापक' क्रीडिष्यामः।**

(क) द्वे महिले तत्र आगच्छताम्। ..........................................................................

(ख) पुत्रः जनकम् अनमत्। ..........................................................................

(ग) इयं मम सेविका आसीत्। ..........................................................................

(घ) नृपः तं ध्यानेन अपश्यत्। ..........................................................................

(ङ) सः शिशोः खण्डे न अकरोत्। ..........................................................................

© New Saraswati House (India) Private

## 3. उदाहरणम् आधृत्य प्रकृति-प्रत्यय-विभागं कुरुत।

(प्रकृति-प्रत्यय पृथक् कीजिए। Disjoin the given words as directed.)

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| उदाहरणम्- | पठित्वा | – | पठ् | + | क्त्वा | | खादितुम् | – | खाद् | + | तुमुन् |
| (क) | कृत्वा | – | .............. | + | .............. | (ख) | चारयितुम् | – | .............. | + | .............. |
| (ग) | क्रीडितुम् | – | .............. | + | .............. | (घ) | दृष्ट्वा | – | .............. | + | .............. |
| (ङ) | गत्वा | – | .............. | + | .............. | (च) | पाठयित्वा | – | .............. | + | .............. |

## 4. संस्कृतेन अनुवादं कुरुत।

(संस्कृत में अनुवाद कीजिए। Translate into Sanskrit.)

(क) बच्चों को दूध पीना चाहिए। ..........................................................................

(ख) कल मेरा मित्र दिल्ली से आया। ..........................................................................

(ग) हम घूमने के लिए श्रीनगर जाएँगे। ..........................................................................

(घ) चाणक्य एक महान विद्वान और अर्थशास्त्री था। ..........................................................................

# मूल्यपरकम्

1. किं न्यायकाले निष्पक्ष-न्यायं करणीयम्? (क्या न्याय के समय निष्पक्ष न्याय करना चाहिए?)
2. किं त्वं गुणानुसारेण नेतृणाम् चयनं करिष्यसि? (क्या तुम गुणों के अनुसार नेता चुनते हो?)







# याद रखें

1. संस्कृत में प्रकृति-प्रत्यय विभाग से तात्पर्य है, दिए हुए शब्दों में से धातु (प्रकृति) एवं प्रत्यय को अलग करना। यदि ये शब्द उपसर्ग युक्त हों तो उपसर्ग को भी अलग कर देना चाहिए; जैसे–
   आनेतुम् = आ (उपसर्ग) + नी (धातु) + तुमुन् (प्रत्यय)।
2. अशुद्ध वाक्यों को शुद्ध करते समय जहाँ तक संभव हो क्रिया को ही शुद्ध करना चाहिए; जैसे–'बालिका उद्याने क्रीडन्ति' का शुद्ध रूप 'बालिका उद्याने क्रीडति' होना चाहिए न कि 'बालिकाः उद्याने क्रीडन्ति'। यद्यपि यह वाक्य भी व्याकरण की दृष्टि से शुद्ध है, परंतु इसमें अर्थ परिवर्तित हो गया है, क्योंकि मूल वाक्य में एक बालिका के बारे में बात की जा रही है न कि अनेक बालिकाओं के बारे में।

© New Saraswa

# गृह कार्यम् -

**सुलेख** - तन्मय: - एतत् त्वं किम् करोषि ? To
तन्मय: - आम् ! ------------ 'माता - बालक' च अक्रीडाम । (page - 16)

**शब्द - शक्ति -**

**भाषा - अवबोधानम् - प्रश्न - 1 & 2**

**मूल्यपरकम् - 1 & 2 (Both)**

## सूक्तिः

॥ अहिंसा परमो धर्मः ॥

(अहिंसा ही सबसे बड़ा धर्म है।)

# धन्यवाद